# ॥ वाल्मीकि रामायण॥

## ४ किष्किन्धाकाण्ड

### अध्याय ३०

स कामिनं दीनमदीनसत्त्वः
शोकाभिपन्नं समुदीर्णकोपम् ।
नरेन्द्रसूनुर्नरदेवपुत्रं
रामानुजः पूर्वजमित्युवाच ॥ १॥

न वानरः स्थास्यति साधुवृत्ते
न मंस्यते कार्यफलानुषङ्गान् ।
न भक्ष्यते वानरराज्यलक्ष्मीं
तथा हि नाभिक्रमतेऽस्य बुद्धिः ॥ २॥

मतिक्षयाद्ग्राम्यसुखेषु सक्तस्
तव प्रसादाप्रतिकारबुद्धिः ।
हतोऽग्रजं पश्यतु वालिनं स
न राज्यमेवं विगुणस्य देयम् ॥ ३॥

न धारये कोपमुदीर्णवेगं
निहन्मि सुग्रीवमसत्यमद्य ।
हरिप्रवीरैः सह वालिपुत्रो
नरेन्द्रपत्न्या विचयं करोतु ॥ ४॥

तमात्तबाणासनमुत्पतन्तं
निवेदितार्थं रणचण्डकोपम् ।
उवच रामः परवीरहन्ता
स्ववेक्षितं सानुनयं च वाक्यम् ॥ ५॥

न हि वै त्वद्विधो लोके पापमेवं समाचरेत् ।
पापमार्येण यो हन्ति स वीरः पुरुषोत्तमः ॥ ६॥

नेदमद्य त्वया ग्राह्यं साधुवृत्तेन लक्ष्मण ।
तां प्रीतिमनुवर्तस्व पूर्ववृत्तं च सङ्गतम् ॥ ७॥

सामोपहितया वाचा रूक्षाणि परिवर्जयन् ।
वक्तुमर्हसि सुग्रीवं व्यतीतं कालपर्यये ॥ ८॥

सोऽ ग्रजेनानुशिष्टार्थो यथावत्पुरुषर्षभः ।
प्रविवेश पुरीं वीरो लक्ष्मणः परवीरहा ॥ ९॥

ततः शुभमतिः प्राज्ञो भ्रातुः प्रियहिते रतः ।
लक्ष्मणः प्रतिसंरब्धो जगाम भवनं कपेः ॥ १०॥

शक्रबाणासनप्रख्यं धनुः कालान्तकोपमः ।
प्रगृह्य गिरिशृङ्गाभं मन्दरः सानुमानिव ॥ ११॥

यथोक्तकारी वचनमुत्तरं चैव सोत्तरम् ।
बृहस्पतिसमो बुद्ध्या मत्त्वा रामानुजस्तदा ॥ १२॥

कामक्रोधसमुत्थेन भ्रातुः कोपाग्निना वृतः ।
प्रभञ्जन इवाप्रीतः प्रययौ लक्ष्मणस्तदा ॥ १३॥

सालतालाश्वकर्णांश्च तरसा पातयन्बहून् ।
पर्यस्यन्गिरिकूटानि द्रुमानन्यांश्च वेगतः ॥ १४॥

शिलाश्च शकलीकुर्वन्पद्भ्यां गज इवाशुगः ।
दूरमेकपदं त्यक्त्वा ययौ कार्यवशाद्द्रुतम् ॥ १५॥

तामपश्यद्बलाकीर्णां हरिराजमहापुरीम् ।
दुर्गामिक्ष्वाकुशार्दूलः किष्किन्धां गिरिसङ्कटे ॥ १६॥

रोषात्प्रस्फुरमाणौष्ठः सुग्रीवं प्रति कल्ष्मणः ।
ददर्श वानरान्भीमान्किष्किन्धाया बहिश्चरान् ॥ १७॥

शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान् ।
जगृहुः कुञ्जरप्रख्या वानराः पर्वतान्तरे ॥ १८॥

तान्गृहीतप्रहरणान्हरीन्दृष्ट्वा तु लक्ष्मणः ।
बभूव द्विगुणं क्रुद्धो बह्विन्धन इवानलः ॥ १९॥

तं ते भयपरीताङ्गाः क्रुद्धं दृष्ट्वा प्लवङ्गमाः ।
कालमृत्युयुगान्ताभं शतशो विद्रुता दिशः ॥ २०॥

ततः सुग्रीवभवनं प्रविश्य हरिपुङ्गवाः ।
क्रोधमागमनं चैव लक्ष्मणस्य न्यवेदयन् ॥ २१॥

तारया सहितः कामी सक्तः कपिवृषो रहः ।
न तेषां कपिवीराणां शुश्राव वचनं तदा ॥ २२॥

ततः सचिवसन्दिष्टा हरयो रोमहर्षणाः ।

गिरिकुञ्जरमेघाभा नगर्या निर्ययुस्तदा ॥ २३॥

नखदंष्ट्रायुधा घोराः सर्वे विकृतदर्शनाः ।
सर्वे शार्दूलदर्पाश्च सर्वे च विकृताननाः ॥ २४॥

दशनागबलाः के चित्के चिद्दशगुणोत्तराः ।
के चिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ २५॥

कृत्स्नां हि कपिभिर्व्याप्तां द्रुमहस्तैर्महाबलैः ।
अपश्यल्लक्ष्मणः क्रुद्धः किष्किन्धां तां दुरासदम् ॥ २६॥

ततस्ते हरयः सर्वे प्राकारपरिखान्तरात् ।
निष्क्रम्योदग्रसत्त्वास्तु तस्थुराविष्कृतं तदा ॥ २७॥

सुग्रीवस्य प्रमादं च पूर्वजं चार्तमात्मवान् ।
बुद्ध्वा कोपवशं वीरः पुनरेव जगाम सः ॥ २८॥

स दीर्घोष्णमहोच्छ्वासः कोपसंरक्तलोचनः ।
बभूव नरशार्दूलसधूम इव पावकः ॥ २९॥

बाणशल्यस्फुरज्जिह्वः सायकासनभोगवान् ।
स्वतेजोविषसङ्घातः पञ्चास्य इव पन्नगः ॥ ३०॥

तं दीप्तमिव कालाग्निं नागेन्द्रमिव कोपितम् ।
समासाद्याङ्गदस्त्रासाद्विषादमगमद्भृशम् ॥ ३१॥

सोऽङ्गदं रोषताम्राक्षः सन्दिदेश महायशाः ।
सुग्रीवः कथ्यतां वत्स ममागमनमित्युत ॥ ३२॥

एष रामानुजः प्राप्तस्त्वत्सकाशमरिन्दमः ।
भ्रातुर्व्यसनसन्तप्तो द्वारि तिष्ठति लक्ष्मणः ॥ ३३॥

लक्ष्मणस्य वचः श्रुत्वा शोकाविष्टोऽङ्गदोऽब्रवीत् ।
पितुः समीपमागम्य सौमित्रिरयमागतः ॥ ३४॥

ते महौघनिभं दृष्ट्वा वज्राशनिसमस्वनम् ।
सिंहनादं समं चक्रुर्लक्ष्मणस्य समीपतः ॥ ३५॥

तेन शब्देन महता प्रत्यबुध्यत वानरः ।
मदविह्वलताम्राक्षो व्याकुलस्रग्विभूषणः ॥ ३६॥

अथाङ्गदवचः श्रुत्वा तेनैव च समागतौ ।
मन्त्रिणो वानरेन्द्रस्य संमतोदारदर्शिनौ ॥ ३७॥

प्लक्षश्चैव प्रभावश्च मन्त्रिणावर्थधर्मयोः ।
वक्तुमुच्चावचं प्राप्तं लक्ष्मणं तौ शशंसतुः ॥ ३८॥

प्रसादयित्वा सुग्रीवं वचनैः सामनिश्चितैः ।
आसीनं पर्युपासीनौ यथा शक्रं मरुत्पतिम् ॥ ३९॥

सत्यसन्धौ महाभागौ भ्रातरौ रामलक्ष्मणौ ।
वयस्य भावं सम्प्राप्तौ राज्यार्हौ राज्यदायिनौ ॥ ४०॥

तयोरेको धनुष्पाणिर्द्वारि तिष्ठति लक्ष्मणः ।
यस्य भीताः प्रवेपन्ते नादान्मुञ्चन्ति वानराः ॥ ४१॥

स एष राघवभ्राता लक्ष्मणो वाक्यसारथिः ।
व्यवसाय रथः प्राप्तस्तस्य रामस्य शासनात् ॥ ४२॥

तस्य मूर्ध्ना प्रणम्य त्वं सपुत्रः सह बन्धुभिः ।
राजंस्तिष्ठ स्वसमये भव सत्यप्रतिश्रवः ॥ ४३॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com